शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)

साहित्यदर्पण सप्तमपरिच्छेदः

रसानां परस्परविरोधस्य परिहारः सङ्क्षेपेण निरूपणम्।

'विरोधिनोऽपि स्मरणे साम्येन वचनेऽपि वा।
भवेद्विरोधो नान्योन्यमङ्गिन्यङ्गत्वमाप्तयोः॥'

अर्थात् विरुद्धस्य रसस्य भावस्य वा स्मरणे-प्रत्य-भिज्ञादौ वा साम्येन कथने वा परस्परं कविनिबद्धे रसे विरोधिनो रसाः स्थिता भवन्ति तत्र अङ्गत्वं लक्षणीयः कदाचित् अन्ययोरपि द्वितयं अङ्गत्वमुपलक्षणम्। विरोधी नाम दोषो न भवेत् इत्यर्थः। विरोधिनः स्मरणे विरोधाभावो यथा —

'अयं स रशनोत्कर्षी पीनस्तनविमर्दनः।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः॥'

अत्र भूरिश्रवसः करस्य विलोकने करुणे सति तेन सम्भोगानां शृङ्गारानां स्मरणात् अनुभावानां रशनोत्कर्षादीनां शोकोद्दीपकतया करुणरसानुकूलत्वात् एवं सम्भोगस्य शृङ्गारस्य अङ्गतया अनुभूयमानेन करुणेन सह न विरोधः।

विरोधिनः साम्येन वचने विरोधाभावो यथा —

'सरागया स्रुतघनघर्मतोयया कराहतिध्वनितपृथूरुपीठया।
मुहुर्मुहुर्दशनविलङ्घितोष्ठया रुषा नृपाः प्रियतमयेव भेजिरे॥'

अत्र सम्भोगशृङ्गारो वर्णितोऽपि वीररसस्याङ्गत्वेन तत्साम्येन कथनात् अतो न दोषः। सादृश्येन विवक्षितः कविना।

एकस्मिन्नाश्रये भावे अङ्गत्वमाप्तानां रसानां मिथो विरोधाभावो यथा — 'एकं ध्याननिमीलनान्मुकुलितप्रायं द्वितीयं पुनः
पार्वत्या वदनाम्बुजस्तनभरे सम्भोगभावालसम्।
अन्यद् - दूरविकृष्टचापमदनक्रोधानलोद्दीपितं
शम्भोर्भिन्नरसं समाधिसमये नेत्रत्रयं पातु वः॥'

अत्र भगवद्विषयकरतिभावे कवेस्तात्पर्यात् स एव प्रधानम्। शान्तशृङ्गाररौद्ररसास्तदङ्गतां प्राप्ता इति एकाश्रयत्वे विरुद्धानामपि अङ्गत्वात् तेषां मिथो विरोधो नास्ति इति न दोषः। यथा वा —

'क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंऽशुकान्तं
गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः सम्भ्रमेण।
आलिङ्गन् योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवार्द्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः॥'

अत्र कविनिष्ठा भगवद्विषया रतिः प्रधानम्। तस्याः परिपोषकतया भगवतस्त्रिपुरध्वंसं प्रति उत्साहस्य परिपुष्टतया रसपदवीं अप्राप्ततया केवलस्थायिभावरूपेण विद्यमानस्य अङ्गतया करुणोऽङ्गम्। तस्य च करुणस्य कामीवेति साम्यवशात् शृङ्गारोऽङ्गम्। एवं करुणस्यापि अतिवेलमास्वादस्य अविच्छेदात् (अविश्रान्तिपात्रतया) उत्साहाङ्गतयैवेति न परस्परं करुणशृङ्गारयोः भगवदुत्साहे परिपुष्टे तद्विषयकरतिभावास्वादे एकवाक्यतया परस्परम् अङ्गभावात् अङ्गत्वेन न विरोधः।

इति दिक्।

उपेन्द्र झा
28/4/20
सहायकप्राध्यापक साहित्य
रा० उ० सं० महाविद्यालय
पुरुषोत्तमपुर, भदौड़ा (?)

शास्त्रि द्वितीय खण्डस्य कृते साहित्यम् — साहित्य दर्पणः चतुर्थ परिच्छेदः

चित्रकाव्यं तृतीयभेदः साहित्य दर्पणकारस्य अभिमतो न वा ? स्वमतालोचना पूर्वकं उपपत्तयो स्वमत प्रदर्शनम् ।

साहित्य दर्पणकारो हि चित्रकाव्यं न मनुते। तेन मम्मटमतं उपस्थापितं दूषितम् - 'केचित् चित्राख्यं तृतीयं काव्यभेदम् इच्छन्ति तदाहुः — 'शब्दचित्रं वाच्यचित्रं अव्यङ्ग्यं तु अवरं स्मृतम्' ।। इति- तन्न, यदि हि अव्यङ्ग्यत्वेन व्यङ्ग्याभाववत्त्वं तदा तस्य काव्यत्वमपि नास्तीति प्रागेवोक्तम्। ईषद् व्यङ्ग्यत्वमिति चेत्, किं नाम ईषद् व्यङ्ग्यत्वम्? आस्वाद्यव्यङ्ग्यत्वम् अनास्वाद्यव्यङ्ग्यत्वं वा? आद्ये प्राचीनभेदयोः एवान्तःपातः, द्वितीये त्वकाव्यत्वम्। यदि च आस्वाद्यत्वं तदा क्षुद्रत्वमेव। क्षुद्रतया अनास्वाद्यत्वात्। यदुक्तं ध्वनिकृता — 'प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते।

उभे काव्ये ततोऽन्यद् यत् तच्चित्रमभिधीयते ।।' इति

अत्र विचार्यते :— चमत्कार जनकं वर्णनरूपेण काव्य लक्षणत्वात्, चमत्कारस्य च रसभावालंकारेषु अनुगतत्वात्, गुणालंकारयुक्तं अव्यङ्ग्यं काव्यं चित्रम्। अव्यङ्ग्यं इत्यस्य न व्यङ्ग्याभावोऽर्थः, किन्तु स्फुट व्यङ्ग्य रहितत्वम् अर्थः। एवं वाच्यार्थजन्यचमत्कारशालि व्यङ्ग्यार्थे ध्वनितेऽपि उत्तमं काव्यम्। तुल्ये न्यूनतायां च गुणीभूतव्यङ्ग्यं नाम मध्यमं काव्यम्। अव्यङ्ग्यं तु अधमं चित्र काव्यम्। तच्च शब्दचित्रं वाच्यचित्रं चेति द्विविधम्। यथाह मम्मटः — 'शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम् ।' इति

किञ्च विश्वनाथेन स्वमत समर्थने ध्वनिकारस्य येयं कारिका प्रस्तुता सापि विश्वनाथस्य सिद्धान्तस्य प्रतिकूलैव। यतो हि सापि त्रिविधमेव काव्यं साधयति। प्रधान व्यङ्ग्य गुणीभूतव्यङ्ग्याभ्यां भिन्नं काव्यं चित्रमिति स्फुट कारिकायाः अर्थः। अत एव तद्रूपमेव चित्र काव्यं द्विधा विभज्य वदति — 'चित्रं शब्दार्थभेदेन द्विविधं च व्यवस्थितम्। तत्र किञ्चिच्छब्दचित्रं वाच्यचित्रमतः परम् ।।' इति

इत्थं चित्रकाव्यमिदम् आनन्दवर्धनाचार्यः (ध्वन्यालोककारः) मम्मटः (काव्यप्रकाशकारः) प्रभृतीनां प्राचीनाचार्याणामपि स्वमत मतो अवश्यमेव मन्तव्यम् । इत्यलम्

—

उपेन्द्र झा
25/4/20
शास्त्री प्र० साहित्य
रा० उ० सं० महावि०
सुरवेका, पूर्णियाँ

शास्त्री प्रथमखण्डस्य कृते (साहित्यम्) साहित्य दर्पणः प्रथम परिच्छेदः

गुणानां रसधर्मत्वात्, रसात्मकस्य वाक्यस्य काव्यत्वात् कथं गुणाः काव्यस्योत्कर्षे हेतव इति प्रतिपादनम्।

ननु यथा निरलङ्कारकाव्यापेक्षया सालङ्कार काव्यस्य उत्कृष्टता न तथा निर्गुण काव्यापेक्षया सगुण काव्यस्योत्कृष्टता वक्तुं शक्यते। यतः गुणानां रसैकधर्मत्वात्, निर्गुणानां च नीरसत्वात्, नीरसानां च अकाव्यत्वम् एवेति गुणाः काव्यस्य उत्कर्षका इति कथनम् असङ्गतम् इति चेत्, न। यद्यपि गुणाः रसस्य धर्माः, रसेन विना न तेषां स्थितिः तथापि अत्र गुण पदं लक्षणया गुणाभिव्यञ्जक शब्दार्थ-परम्। अतः 'गुणाः रसस्य उत्कर्ष हेतवः' इत्यस्य तात्पर्यं यत् गुणाभिव्यञ्जकाः शब्दार्थाः रसस्य उत्कर्षकाः इति। अतः गुणाभिव्यञ्जक शब्द विरहितात् काव्यात् गुणाभिव्यञ्जक शब्द सहितं काव्यम् उत्कृष्टं भवति इति दिक्।

उपेन्द्र झा
२८/४/२०
एसो० प्रो० साहित्य
रा० उ० सं० महावि०
कुरसेला, पूर्णियाँ